श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### चतुःषष्टितमः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## चतुःषष्टितमः सर्गः

*दधिमुखतः सुग्रीवसन्देशमाकर्ण्याङ्गदहनुमदादीनां वानराणां किष्किन्धायां गमनं हनुमता श्रीरामं प्रणम्य सीतादर्शनसमाचारस्य निवेदनं च*

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः।
राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत्॥ ५.६४.१ ॥

स प्रणम्य च सुग्रीवं राघवौ च महाबलौ।
वानरैः सहितः शूरैर्दिवमेवोत्पपात ह॥ ५.६४.२ ॥

स यथैवागतः पूर्वं तथैव त्वरितं गतः।
निपत्य गगनाद् भूमौ तद्वनं प्रविवेश ह॥ ५.६४.३ ॥

स प्रविष्टो मधुवनं ददर्श हरियूथपान्।
विमदानुद्धतान् सर्वान् मेहमानान् मधूदकम्॥ ५.६४.४ ॥

स तानुपागमद् वीरो बद्ध्वा करपुटाञ्जलिम्।
उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम्॥ ५.६४.५ ॥

सौम्य रोषो न कर्तव्यो यदेभिः परिवारणम्।
अज्ञानाद् रक्षिभिः क्रोधाद् भवन्तः प्रतिषेधिताः॥ ५.६४.६ ॥

श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु।
युवराजस्त्वमीशश्च वनस्यास्य महाबल॥ ५.६४.७ ॥

मौर्ख्यात् पूर्वं कृतो रोषस्तद् भवान् क्षन्तुमर्हति।
यथैव हि पिता तेऽभूत् पूर्वं हरिगणेश्वरः॥ ५.६४.८ ॥

तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम।
आख्यातं हि मया गत्वा पितृव्यस्य तवानघ॥ ५.६४.९ ॥

इहोपयानं सर्वेषामेतेषां वनचारिणाम्।
भवदागमनं श्रुत्वा सहैभिर्वनचारिभिः॥ ५.६४.१० ॥

प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम्।
प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः॥ ५.६४.११ ॥

शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः।
श्रुत्वा दधिमुखस्यैतद् वचनं श्लक्ष्णमङ्गदः॥ ५.६४.१२ ॥

अब्रवीत् तान् हरिश्रेष्ठो वाक्यं वाक्यविशारदः।
शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः॥ ५.६४.१३ ॥

अयं च हर्षादाख्याति तेन जानामि हेतुना।
तत् क्षमं नेह नः स्थातुं कृते कार्ये परन्तपाः॥ ५.६४.१४ ॥

पीत्वा मधु यथाकामं विक्रान्ता वनचारिणः।
किं शेषं गमनं तत्र सुग्रीवो यत्र वानरः॥ ५.६४.१५ ॥

सर्वे यथा मां वक्ष्यन्ति समेत्य हरिपुङ्गवाः।
तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम्॥ ५.६४.१६ ॥

नाज्ञापयितुमीशोऽहं युवराजोऽस्मि यद्यपि।
अयुक्तं कृतकर्माणो यूयं धर्षयितुं बलात्॥ ५.६४.१७ ॥

ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमुत्तमम्।
प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः॥ ५.६४.१८ ॥

एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ।
ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते॥ ५.६४.१९ ॥

तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित्।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम्॥ ५.६४.२० ॥

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः।
स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः॥ ५.६४.२१ ॥

त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात् पदम्।
क्वचिद् गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते॥ ५.६४.२२ ॥

एवं तु वदतां तेषामङ्गदः प्रत्यभाषत।
साधु गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः॥ ५.६४.२३ ॥

उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः।
कृत्वाऽऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवापलाः॥ ५.६४.२४ ॥

अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम्।
तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः॥ ५.६४.२५ ॥

विनदन्तो महानादं घना वातेरिता यथा।
अङ्गदे समनुप्राप्ते सुग्रीवो वानरेश्वरः॥ ५.६४.२६ ॥

उवाच शोकसन्तप्तं रामं कमललोचनम्।
समाश्वसिहि भद्रं ते दृष्ट्वा देवी न संशयः॥ ५.६४.२७ ॥

नागन्तुमिह शक्यं तैरतीतसमयैरिह।
अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन॥ ५.६४.२८ ॥

न मत्सकाशमागच्छेत् कृत्ये हि विनिपातिते।
युवराजो महाबाहुः प्लवतामङ्गदो वरः॥ ५.६४.२९ ॥

यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः।
भवेत् तु दीनवदनो भ्रान्तविप्लुतमानसः॥ ५.६४.३० ॥

पितृपैतामहं चैतत् पूर्वकैरभिरक्षितम्।
न मे मधुवनं हन्याददृष्ट्वा जनकात्मजाम्॥ ५.६४.३१ ॥

कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत।
दृष्टा देवी न सन्देहो न चान्येन हनूमता॥ ५.६४.३२ ॥

नह्यन्यः कर्मणो हेतुः साधनेऽस्य हनूमतः।
हनूमतीह सिद्धिश्च मतिश्च मतिसत्तम॥ ५.६४.३३ ॥

व्यवसायश्च शौर्यं च श्रुतं चापि प्रतिष्ठितम्।
जाम्बवान् यत्र नेता स्यादङ्गदश्च हरीश्वरः॥ ५.६४.३४ ॥

हनुमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा।
मा भूश्चिन्तासमायुक्तः सम्प्रत्यमितविक्रम॥ ५.६४.३५ ॥

यदा हि दर्पितोदग्राः सङ्गताः काननौकसः।
नैषामकृतकार्याणामीदृशः स्यादुपक्रमः॥ ५.६४.३६ ॥

वनभङ्गेन जानामि मधूनां भक्षणेन च।
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे॥ ५.६४.३७ ॥

हनूमत्कर्मदृप्तानां नदतां काननौकसाम्।
किष्किन्धामुपयातानां सिद्धिं कथयतामिव॥ ५.६४.३८ ॥

ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः।
आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः॥ ५.६४.३९ ॥

आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः।
अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम्॥ ५.६४.४० ॥

तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः।
निपेतुर्हरिराजस्य समीपे राघवस्य च॥ ५.६४.४१ ॥

हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः।
नियतामक्षतां देवीं राघवाय न्यवेदयत्॥ ५.६४.४२ ॥

दृष्टा देवीति हनुमद्वदनादमृतोपमम्।
आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः॥ ५.६४.४३ ॥

निश्चितार्थं ततस्तस्मिन् सुग्रीवं पवनात्मजे।
लक्ष्मणः प्रीतिमान् प्रीतं बहुमानादवैक्षत॥ ५.६४.४४ ॥

प्रीत्या च परयोपेतो राघवः परवीरहा।
बहुमानेन महता हनूमन्तमवैक्षत॥ ५.६४.४५ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः॥

www.prapatti.com